संस्कृत-वार्ता:

24.04.2024

सायम् - 06:20

<u>मुख्यवार्ता:</u>

- लोकसभा-निर्वाचनस्य द्वितीयचरणार्थं नैर्वाचनिक-प्रचाराभियानम् अद्य सायंकाले सम्पन्नम्।
- आपत्प्रतिरोधि-संरचनायां समायोजितं षष्ठमम् अन्ताराष्ट्रिय-सम्मेलनं सम्बोधयता प्रधानमन्त्रिणा नरेन्द्रमोदिना निगदितं यत् समुचितभविष्याय सौम्याधारभूत - संरचनाभ्य: कृतनिवेश: महत्वपूर्णं वर्तते।
- राष्ट्रपतिपदारूढा द्रौपदीमुर्मु: जलवायु-परिवर्तन-सम्बद्ध-समस्यानां निवारणे वन-संरक्षण-भूमिका: प्रख्यापितवती।
- जम्मूकश्मीर-क्षेत्रस्य शिक्षानिदेशालयेन अद्य जम्मूसंभागस्य विद्यालयानां कृते नूतन: कालो घोषित:।
- आईपीएल इति इंडियन प्रीमियर लीग इत्याख्यायां क्रिकेट-प्रतिस्पर्धा-मालिकायाम् दिल्ली-कैपिटल्स-गुजरात-टाइटेन्सदलयोः मध्ये द्वन्द्वं भविष्यति।

<u>प्रचाराभियानानि</u>

लोकसभा-निर्वाचनस्य द्वितीयचरणार्थं नैर्वाचनिक-प्रचाराभियानम् अद्य सायंकाले सम्पन्नं जातम्। समेषां राजनीतिकदलानां शीर्ष-नेतार: मतदातृन् निजपक्षे आक्रष्टुं नैरन्तर्येण जनसभासु पथप्रदर्शनेषु च संलग्ना: आसन्। द्वितीय-चरणे अस्य मासस्य षड्विंशे दिनाङ्के केरलस्य विंशति: आसनानि, कर्णाटकस्य चतुर्दशासनानि, राजस्थानस्य त्रयोदशासनानि, उत्तरप्रदेश- महाराष्ट्रयोः अष्टासनानि, मध्यप्रदेशस्य सप्तासनानि, असमस्य पञ्चासनानि, बिहारस्यापि पञ्चासनानि, पश्चिमबंगालस्य त्रीणि आसनानि, छत्तीसगढस्यापि त्रीणि आसनानि, त्रिपुरा-जम्मूकश्मीरयो: एकं-एकं आसनं समेत्य द्वितीयचरणे मतदानानि भविष्यन्ति। मणिपुरस्य बाह्य-मणिपुर-संसदीय-क्षेत्रस्य त्रयोदशविधानसभा-क्षेत्रेष्वपि तस्मिन्नेव दिवसे मतदानं प्रकल्पितमस्ति।

मोदी-आपत्प्रबन्धनसम्मेलनं

प्रधानमन्त्रिणा निगदितं यत् समुचितभविष्याय सौम्याधारभूत-संरचनाभ्य: कृतनिवेश: महत्वपूर्णं वर्तते। एकस्मिन् श्रव्य-सन्देशे श्रीमोदी आपत्प्रतिरोधि-संरचनायां समायोजितं षष्ठमम् अन्ताराष्ट्रिय-सम्मेलनं सम्बोधयन् कथितवान् यत् आपदानां मापनं मानव-परिवार-समुदायै: सम्बद्धमस्ति। असौ राष्ट्राणां मध्ये सामूहिक-सौम्यावश्यकताभ्य: बलें प्रदत्तवान्। ध्येयं वर्तते यत् आपात्-प्रतिरोधि-आधारभूत-संरचनायाम् आयोजितस्य अन्ताराष्ट्रिय-सम्मेलनस्य षष्ठं संस्करणम् अद्य नवदिल्ल्यां समारब्धम्, श्वस्तनं यावच्च प्रचलिष्यति।

उत्तराखंड-दीक्षांत कार्यक्रम:

अद्य राष्ट्रपतिपदारूढा द्रौपदीमुर्मु: जलवायुमण्डल-परिवर्तन-सम्बद्ध-समस्या: प्रकाशितवती अपि च तत्सम्बद्धानां समस्यानां समाधानाय वन-संरक्षण-भूमिका: अपि प्रख्यापितवती। अद्य देहरादूननगरे वनानुसन्धान-संस्थाने भारतीय-वन-सेवाया: परिवीक्षाधीनानां दीक्षान्त-समारोहं सम्बोधयन्ती राष्ट्रपति: प्रावोचत् यत् मानवा: सायासं वनानां महत्वं विस्मारयन्ति। अनया सबलं प्रख्यापितं यत् मनुष्या: अस्या: पृथिव्या: अमूल्य संसाधनानां स्वामिन: नैव सन्ति अपि तु संरक्षका: सन्ति। अत्रावसरे राष्ट्रपति: परिवीक्षा-अधिकारिण: वनसंरक्षण-संवर्धन-पोषणानां महत्वपूर्ण-कर्तव्यानि प्रति प्रोत्साहितवती। अनया: विश्वास: अभिव्यक्त: यत् एते अधिकारिण: एता: वार्ता: हृदि निध्याय पूर्णमनसा कार्यं समाचरिष्यन्ति। अवधेयं वर्तते यत् एतस्मिन् प्रख्याते दीक्षान्त-समारोहे इन्दिरा-गांधी-राष्ट्रिय-वनाकादम्या: नवनवति परिवीक्षार्थिभि: समं मित्रराष्ट्रस्य भूटानस्य प्रशिक्षु-अधिकारी-द्वयेनापि अकादम्या: द्विवर्षीय: पाठ्यक्रम: सम्पूरित:। वर्तमानसत्रे मध्यप्रदेशाय सर्वाधिकं पंचदश उत्तराखण्डाय च त्रय: अधिकारिण: मिलिता:।

जम्मूकश्मीर-विद्यालयकाल:

जम्मूकश्मीर क्षेत्रस्य शिक्षानिदेशालयेन अद्य जम्मूसंभागस्य विद्यालयानां कृते परिवर्तित: नूतन: कालो घोषित:। आकाशवाण्या: जम्मूक्षेत्रस्य वार्ताहरेण सूचितं यत् परिवर्तित: नूतन: विद्यालयकाल: प्रात: अष्टवादनत: द्विवादनपर्यन्तं भविष्यति। अस्यादेशस्य अनुपालनं सर्वे शासकीय-शासकीयेतरा: विद्यालयाश्च करिष्यन्तीति।

## छत्तीसगढ-प्रधानमन्त्रि-उपवेशनम्

भारतीयजनतापार्टीतिदलस्य वरिष्ठनेत्रा प्रधामन्त्रिणा च नरेन्द्रमोदिना अद्य छत्तीसगढस्य सरगुजा-लोकसभा-क्षेत्रस्य अम्बिकापुरनगरे एक: जनसमूह: सम्बोधयन्ता उक्तं यत् कांग्रेसदलं जाति-धर्मयो: आधारे आरक्षणप्रदानं करोति। श्रीमोदिना प्रोदीरितं यत् कांग्रेसदलं संविधानं परिवर्त्य अनुसूचितजाति-जनजाति-वंचितवर्गाणाम् अधिकारान् स्वीय-मतदान-कोषत्वेन कर्तुम् इच्छति। असौ निगदितवान् यत् आरक्षणरक्षा केवलं भाजपेतिदलेन एव भवितुमर्हति। श्रीमोदिना अग्रे भणितं यत् ये जना: भारतम् आत्मनिर्भरं द्रष्टुं न इच्छन्ति ते देशे विपक्षि-संयुतिदलयुतं निर्बलप्रशासनम् इच्छन्ति। अपि च केन्द्रप्रशासनं भाजपेतिदलम् आतंकवाद-नक्सलवादौ विरूद्ध कठोरतया कार्याचरणं विदधाति। तत्रैव कांग्रेस इति दलं हिंसासंवर्धनाय कार्यं समाचरति।

## राजस्थान चिकित्सा शिखाविभाग:

राजस्थान राज्यस्य प्रशासनेन चिकित्साशिक्षाविभागे सर्वेषु चिकित्सालयेषु मानवीय-अंकानां ऊतकानां च प्रत्येकं प्रकरणे दातु: प्राप्तकर्तुश्च पूर्णतया पारदर्शिता भवेदिति-मत्वा विशिष्ट-राष्ट्रिय-अंगोतकप्रत्यारोपण -संघस्य घटनाय निर्देश: प्रदत्त:। डॉ.रश्मिगुप्ता इत्यनया अधिकारिणा दिड्निर्देशा: प्रसारयन्त्या प्रोक्तं यत् अंगप्रत्यारोपणे सक्षमा: संस्था: चतुर्विंशति होरासु विशिष्ट-पारिचायिकांकं सृजन्त्विती, येन पारदर्शिता स्यात्।

## डी.आर.आई. मुम्बई

मुम्बईस्थेन राजस्वनिदेशालयेन चत्वारो जना: निगडिता: सन्ति, तैस्सह् वैदेशिकं प्रायश: सार्ध नव किलो भारात्मक: स्वर्णधातु: पादोन सप्तदश किलो भारात्मकश्च रजतम् अपि सम्प्राप्तम्। एते झावेरी- विपण्यां धात्वो: तरलीकरणाय प्रयासरता: आसन्।

## असम-द्वितीयचरणीयमतदानम्

असमराज्ये द्वितीयचरणीयमतदाने पंच- लोकसभासु मतदानं भविता। तदर्थं वरिष्ठा: नेतार: अद्यान्तं प्रचारता: आसन्। यत्र एकषष्टि: प्रत्याशिन: स्वभाग्यं परीक्षन्त: सन्ति, तत्रैव सप्तसप्ततिलक्षाधिका: जना: एतेषां प्रत्याशिनां भाग्यं परीक्षन्ते। दलगांव इत्यत्र राज्यस्य मुख्यमन्त्रिणा हेमन्तबिस्वसरमा इत्यनेन नैर्वाचनिक सभासम्बोधिता। यत्र तेन उक्तं यत् असमप्रशासनेन वर्षे अस्मिन् पंचाशत्सहस्रयुवान: वृत्तिषु नियोजिता: भविष्यन्ति इति।

प्रधानमन्त्री/पंचयती-राज दिवस:

प्रधानमन्त्रिणा नरेन्द्रमोदिना राष्ट्राय पंचायती-राज-दिवसस्य शुभाशया: प्रदत्ता:। एकस्मिन् सामाजिक-संचारतन्त्रजाले प्रसारिते सन्देशे तेन ग्राम्यस्तरीय-भारतस्य परिवर्तनाय जनजीवने च उन्नत-गुणवत्ता-सुनिश्चयाय निम्नस्तरेषु कार्यरता: जना: प्रशंसिता:। तेनोक्तं यत् प्रशासनम् पंचायतीराजसंस्थानां दृढीकरणे, जनानां स्वप्नेभ्य: उड्डयनपक्षदानार्थञ्च कार्यं कुर्वदेव स्थास्यतीति।

अमरीका-टिकटॉक

अमरीकादेशीयेन सीनेटाख्येन संसदा एको विवादास्पदविधेयक: अभिस्वीकृत:, यत्र टिकटॉक इत्याख्य: अनुप्रयोग: प्रतिबन्धितो भवितुं शक्नोत्विति। यदि विधेयकोऽयं पारित: भविष्यति चेत् चीनदेशस्य अनुप्रयोग: बाइटडांस इत्यस्य अधिकारक्षेत्रे स्वस्याधिकारभागस्य विक्रयणाय नवमासानां काल: अवशिष्ट: भविष्यति उत वा अनुप्रयोगोऽयं अमरीकादेशे प्रतिबन्धितो भविष्यतीति।

आई.पी.एल.

आईपीएल इति इंडियन प्रीमियर लीग इत्याख्यायां क्रिकेट-प्रतिस्पर्धा-मालिकायाम् अद्य दिल्ल्याः अरूण जेटलीति क्रीडांगणे दिल्ली-कैपिटल्स-गुजरात-टाइटेन्स दलयोः मध्ये सायंसार्धसप्तवादने स्पर्धा भविष्यति।

।। इति वार्ता: ।।